শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী আপটীকর ৱিরচিতঃ

# ॥ শ্রীহনূমৎসংস্তৱঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীহনূমৎসংস্তৱঃ ॥

নমাম্যঞ্জনীনন্দনং ৱাযুপুত্রং
    নমামি প্রভুং ৱানরাণাং গণানাম্।
সদা রামনামামৃতং সেৱমানং
    নমামি প্রভুং মারুতিং রামদূতম্॥ **1** ॥

তডিত্তেজসং ৱাযুৱেগং বলিষ্ঠং
    চিরঞ্জীৱিনং দিৱ্যৱজ্রাঙ্গদেহম্।
দিতেঃ সন্ততিং সংহরন্তং কপীন্দ্রং
    ৱরেণ্যং শরণ্যং নিতান্তং ভজেঽহম্॥ **2** ॥

মহাসাগরং লীলযা লঙ্ঘযিৎৱা
    ৎৱযাঽঽশ্ৱাসিতা ভূমিকন্যা সশোকা।
ৎৱযা রাক্ষসেন্দ্রস্য লঙ্কা ৱিদগ্ধা
    ৎৱযৈতাদৃশী স্ৱামিসেৱা ৱিধত্তা॥ **3** ॥

ৎৱদীযেন ৱেগেন তুল্যো ন ৱাযু -
    র্ন ৱা মানসং মানৱানাং কপীশ।
সুমিত্রাসুতপ্রাণরক্ষার্থমেৱ
    গিরীন্দ্রাগ্রমুৎপাট্য ৱেগেন নীতম্॥ **4** ॥

ৱরিষ্ঠা ৱদান্যাঽস্তি সেৱা ৎৱদীযা
    প্রভূ রামচন্দ্রস্ত্ৱযৈৱ প্রসন্নঃ।
ৎৱমেৱাসি চাদর্শভূতো নরাণাং
    ভৱৎপাদপদ্মং সদা ৱন্দনীযম্॥ **5** ॥

ৎৱমেৱাগ্রণীর্ধীৱরাণাং নরাণাং
 ৎৱমেৱাসি নেতা বলোপাসকানাম্।
ভুভুঃকারনাদেন রক্ষঃ সমূহা -
 স্ত্ৱযা নাশিতা ৱানরেন্দ্রেণ সর্ৱে॥ **6**॥

দশাস্যস্য কীর্তিং ৱিনাশং নযন্তং
 সুদীনাঞ্জনাংস্তারযন্তং কপীন্দ্রম্।
প্রভো রামচন্দ্রস্য ভক্তানৱন্তং
 হনূমন্তমেকং স্মরামি প্রভাতে॥ **7**॥

অহঙ্কারযুক্তশ্চ ৱিদ্যামদান্ধঃ
 সদা দ্রৱ্যলুব্ধোঽহমক্রোধহীনঃ।
মহামোহযুক্তে ভৱেঽস্মিন্নিমগ্নং
 হনূমন্ হতাশং জনং পাহি নিত্যম্॥ **8**॥

ইমং সংস্তৱং রামদূতস্য রম্যং
 পঠেৎ সাদরং যো নরো ভক্তিযুক্তঃ।
সমস্তানি দুঃখানি নীৎৱা ৱিনাশং
 ভৱেত্তস্য ৱাতাত্মজঃ সৌখ্যদাতা॥ **9**॥

॥ শ্রীহনূমৎসংস্তৱঃ সমাপ্তঃ ॥